दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-267

1 20.07.2024 शनिवासरः वि.सं. २०८० आषाढ़चतुर्दशी श्रावण 05 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## बांग्लादेशे आरक्षणसम्बद्ध-विरोधप्रदर्शने मृतकानां संख्या समेध्य एकोन-चत्वारिशत् यावत् समभवत्



बांग्लादेशे आरक्षणसम्बद्ध-विरोधप्रदर्शने मृतकानां संख्या समेध्य एकोनचत्वारिशत् यावत् समभवत्। प्रशासनिक कुकृत्यवसरेषु आरक्षणप्रणाल्यां परिष्करणपरां अभियाचनामालक्ष्य छात्रैः विरोधप्रदर्शन समाचरितमासीत्। अत्रान्तरे ढाकास्थितेन भारतीय- उच्चायोगेन भारतीयनागरिकाः गृहे एवम् अवस्थातुं परामर्शिताः। विदेश मन्वालयेन सामाजिकान्तर्जालिक सन्देशमाध्यमेन बांग्लादेशे स्थिताः भारतीयनागरिकाः भारतीय उच्चायोगस्य निर्देशान् अनुकर्तुं संप्रार्थिताः।

## माइक्रोसॉफ्ट सॉफ्टवेयर विकृतिकारणात् विश्वे लक्षाधिकाः जनाः प्रभाविताः

माइक्रोसॉफ्ट सॉफ्टवेयर विकृतिकारणात् विश्वस्मिन्नपि विश्वे लक्षाधिकाः जनाः प्रभाविताः समभवन्। अनेन कारणेन उद्योगकार्येषु, बैंकिंगसेवासु सहैव अन्ताराष्ट्रिय विमानसेवासु च बाधाः सञ्जायन्ते। भारते इंडिगो, अकासा-स्पाइस जेट इत्येतेषां कार्याणि अशेषे हि देशे प्रभावितानि। इयं समस्या वस्तुतः अमेरिकास्थेन साइबर सुरक्षा प्रदाता 'क्राउडस्ट्राइक' इत्यनेन सम्बन्धितास्ति। समवायेन कथितं यत् तेषां अभियान्विकाः समस्यायाः निराकरणार्थं सक्रियरूपेण कार्यरताः सन्ति। केन्द्रीयमन्त्रिणा अश्विनी वैष्णवेन कथितं यत् सर्वकारः माइक्रोसॉफ्ट समवायेन सह संपर्कं करोति। समस्यां दूरीकर्तुं प्रयासाः जागमानाः सन्ति।

# संसदः प्रावृट्सत्रे आपदाप्रबन्धविधेः

## संशोधनेन सह षड्-नूतनविधेयकाः प्रस्तोष्यन्ते

**हिमसंस्कृतवार्ताः।** सर्वकारेण आगामिसप्ताहात् प्रारभ्यमाणे संसदः प्रावृट्सत्रे आपदाप्रबन्धविधेः संशोधनेन सह षड्-नूतनविधेयकाः प्रस्तोष्यन्ते। वित्तविधेयकमतिरिच्य सर्वकारेण नागरिकोड्डयनक्षेत्रे व्यापारे सौकर्यार्थं भारतीय वायुयान- विधेयकः चतुर्विंशत्यधिक-द्विसहस्रतमः सूचीबद्धो कृतः। संसदः प्रावृट्सत्रं जुलाईमासस्य द्वाविंशति-तिनाङ्कादारभ्य अगस्तमासस्य द्वादश-दिनांकं यावत् प्रचलिष्यति। वित्तमन्त्री निर्मला सीतारमण जुलाईमासस्य त्रयोविंशतितिदिनांके केन्द्रीय आयव्ययकं प्रकाशयिष्यति।



## खेलो-इण्डिया-टैलेंट आइडेंटिफिकेशन इत्यभियानस्य द्वितीयचरणस्य उद्घाटनम् अकरोत् युवप्रकरण-क्रीडामन्त्री




युवप्रकरण-क्रीडामन्त्री-मनमुखमण्डाविया इत्येषः खेलो-इण्डिया-टैलेंट आइडेंटिफिकेशन इत्यभियानस्य द्वितीयचरणस्य उद्घाटनम् अकरोत्। अनेन नूतनाः क्रीडकाः अत्याधुनिक प्रविधिना अन्विष्य परिपोषयिष्यन्ते। अस्याभियानस्य उद्देश्यं तावत् प्रातिभम् अन्विष्य अग्रे नयनम् इत्वस्ति। अवसरेऽस्मिन् प्रवदता मण्डाविया इत्यमुना प्रोदीरितं यत् कीर्तिपरियोजनायासः उद्देश्यं नगरेषु, ग्रामेषु आदिवासीक्षेत्रेषु च क्रीडाप्रतिभानाम् अन्वेषणं वर्तते। सः सबलं प्रत्यपादयत् यत् नरेन्द्रमोदीसर्वकारस्य तृतीयकार्यकालस्य आदिमशतविवसेषु एक लक्षाधिकाः क्रीडाप्रतिभागिनः सन्ति।

## जयपुरनगरस्य राजस्थान-अन्ताराष्ट्रीयकेन्द्रे "यशस्विनी" जागरूकता अभियानस्य उद्घाटनम्



सूक्ष्मलघु-मध्यमोद्योगस्य केन्द्रीय मन्त्री जीतन राम मांझी इत्येषः महिलानाम् उद्यमे एवं स्वव्ययवसायक्षेत्रे अग्रे आगन्तुं समाह्वाननं कृतवान्। जयपुरनगरस्य राजस्थान-अन्ताराष्ट्रीयकेन्द्रे आयोजितस्य प्रथमस्य "यशस्विनी" जागरुकता अभियानस्य उद्घाटनं कुर्वन् सः अवदत् यत् महिला-उद्यमिनां सहायता प्रदातुं प्रवर्धनं च उद्दिश्य अस्य अभियानस्य आरम्भः कृतः। मान्झीमहोदयेन विभिन्नानाम् उद्योगानां समूहानां निर्माण बलं दत्तं तथा च सूक्ष्मलघु-मध्यम उद्योगसदृशैव एतेषां समूहानां कृते वैकवित्तप्रदानस्य आह्वानं कृतम्। एमएसएमई राज्यमन्त्री शोभा करण्दलाने स्वसम्बोधने अवदत् यत् महिला उद्यमिनः प्रवर्धयितुं सर्वकार अनेकानि योजनानि चालयति। स अवदत् यत् आर्थिकरूपेण समर्थाः भूत्वा एव श्रियः आत्मनिर्भरतां आत्मविश्वासं च प्राप्तुं शक्नुवन्ति। अस्मिन् कार्यक्रमे षड् शतोप्यधिकाः महिला उद्यमिनः, स्वसहायतासमूहस्य सदस्याः, सूक्ष्म अनौपचारिक उद्यमिनः, शिल्पिनः, भावी महिला उद्यमिनः च भागग्रहणं कुर्वन्ति।

## सुभाषितम्

**अभिवादनशीलस्य**
**नित्यं वृद्धोपसेविनः।**
**चत्वारि तस्य वर्धन्ते**
**आयुर्विद्या यशोबलम्।।**

**भावार्थः**- बड़ों का अभिवादन करने वाले मनुष्य की और नित्य वृद्धों की सेवा करने वाले मनुष्य की आयु, विद्या, यश और बल -ये चार चीजें बढ़ती हैं।

हिमसंस्कृतवार्ताः, डॉ.अमित शर्मा

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## अष्टाविशतिः दिनाङ्के मन की बात इति कार्यक्रमः

प्रधानमन्विणा नरेन्द्रमोदिना मन की बात इति कार्यक्रमस्य आगामी संस्करणस्य कृते प्राप्तानां संविदानां विषये प्रसन्नता प्रकटिता। अस्य कार्यक्रमस्य प्रसारणं अस्मिन् मासे अष्टाविशतिः दिनाङ्के भविष्यति। एकस्मिन् सामजिकान्तॉलपटलीय संदेश मध्यमेन प्रधानमंत्री अवदत् यतु, आगामि- मन की बात कार्यक्रमाय अनेकसंदेशा आगताः। प्रधानमन्त्रिणा उक्तं यत्, विशेषतः युवानः समाजे परिवर्तनम् आलक्ष्य ऐक्यप्रयत्नान् प्रकाशयन्ति इति दृष्ट्वा मः प्रसन्नतामनुभवति। सः जनान् आग्रहं कृतवान् यत् ते MyGov, NaMo App इत्यत्र स्वीयविचारान् संप्रेषयन्तु अथवा 180-011-7800 इत्यत्र स्वीयसन्देश समङ्कित्वा प्रेषयन्तु।

## खालिस्तानी आतङ्कवादी लखबीर-सिंहसंधुः लाण्डा इत्येषः निग्रहीतः

पातकनास्त्राणां आपूर्तिसम्बद्धे खालिस्तानी आतङ्कवादी लखबीरसिंहसंधुः लाण्डा इत्येषः निग्रहीतः। मध्यप्रदेशस्य बदवानीमण्डलस्व निवासी बलजीतसिंहः ह्यः एनआइए इत्यनेन गृहीतः। एनआईए इति अभिकरणानुसारं बलजीतसिंहः पंजाबे लाण्डाया सहयोगिषु एकः प्रमुखः शस्त्रापूर्तिकर्ता आसीत्। एतानि शस्त्राणि व्यापारिभ्यः प्रदानार्थम्, उत्पीडनार्थम्, आतङ्कवादसम्बद्धानि कार्याणि सम्पादनाय च प्रयुक्तानि आसन्।




## बिहार-सदृशेषु राज्येषु वस्त्र-परिधान-क्षेत्रे बहु सम्भावना वर्तते-केन्द्रीयवस्त्रमन्त्री गिरिराजसिंहः

केन्द्रीयवस्त्रमन्त्री गिरिराजसिंहः अवदत् यत् तस्य विभागः देशे वस्त्रक्षेत्रस्य आकारं वर्तमानस्य १७६ अरब डॉलरतः ३५० अरब डॉलरपर्यन्तं वर्धयितुम् इच्छति। पटनानगरे वस्त्रनिवेशकसमागमस्य अनन्तरं मीडियासमूहान् सम्बोधयन् सिंहमहोदयः अवदत् यत् तस्य मन्त्रालयेन अस्मिन् क्षेत्रे एकशतकोटिरूप्यकाणां निर्यातस्य लक्ष्यं निर्धारितम् अस्ति। सः अवदत् यत् बिहार-सदृशेषु राज्येषु वस्त्र-परिधान-क्षेत्रे बहु सम्भावना वर्तते। सः अवदत् यत् बेतिया, मुजफ्फरपुर इत्यादयः वस्त्रसमूहाः सफलतया कार्यं कुर्वन्ति, बेगूसरायः राज्यस्य तृतीयसमूहरूपेण विकसितः भविष्यति। श्री गिरिराजसिंहः व्यापारस्य प्रवर्धनार्थं बिहारस्य प्रोत्साहनानाम् औद्योगिकनीतीनां च प्रशंसाम् अकरोत्। सः अवदत् यत् मन्त्रालयः ओडिशा, उत्तरप्रदेशः, मध्यप्रदेशः, राजस्थानः इत्यादिषु क्षेत्रेषु च वस्त्रक्षेत्रे संभावनानां अन्वेषणं करिष्यति।

# हिमाचलविधानसभायां प्रथमवारं निर्वाचितविधायकानां भविष्यति प्रशिक्षणम्




**हिमसंस्कृतवार्ताः - शिमला।** प्रथमवारं विधानसभायाः निर्वाचितसदस्यानां कृते प्रशिक्षणकार्यक्रमस्य आयोजनं क्रियते। २३ जुलै दिनाङ्के प्रथमवारं निर्वाचितानाम् २६ विधानसदस्यानां कृते प्रातः ११ वादनतः सायं ५ वादनपर्यन्तं सम्बोधनं प्रशिक्षणकार्यक्रमः च भविष्यति। प्रशिक्षणकार्यक्रमस्य उद्घाटनं विधानसभाध्यक्षः कुलदीपसिंहपठानिया करिष्यति। कुलदीप पठानिया उक्तवान् यत् नवनिर्वाचितविधायकाः विधानसभायाः कार्याणां क्रियाकलापानां विषये च अवगताः भविष्यन्ति। प्रशिक्षणकाले उपस्थितानां एतेषां सर्वेषां सदस्यानां सदनस्य भूमिका विशेषाधिकारः, प्रश्नहोरा, सदने चर्चा, विधायिकाकार्यं, सदनस्य समितिनां भूमिका च इत्यादीनां महत्त्वपूर्णविषयाणां विषये ज्ञानं भविष्यति इति उक्तवान्। एतदतिरिक्तं सम्माननीयसदस्यानां कृते उपलब्धानां वित्तीयसुविधानां, ई-विधानव्यवस्थायाः च विषये सूचना अपि प्रदत्ता भविष्यति। असौ उक्तवान् यत् एषा देशस्य प्रथमा विधानसभा अस्ति यत्र २०१४ तमस्य वर्षस्य अगस्तमासस्य ४ दिनाङ्के ई-विधानव्यवस्था कार्यान्विता अभवत्। २२ तः अधिकाः राज्यविधानसभाः तस्य अनुसरणं कुर्वन्ति । हिमाचलप्रदेशविधानसभायां सर्वं कार्यं ऑनलाइनमाध्यमेन भवति तथा च सर्वे सम्माननीयाः सदस्याः स्वस्य मोबाईल एपद्वारा सदनस्य कार्यविधिविषये सूचनां प्राप्तुं शक्नुवन्ति।

# नवनिर्वाचिताः विधायकाः २२ जुलाई दिनाङ्के शपथवचनं ग्रहीष्यन्ति



**हिमसंस्कृतवार्ताः - शिमला।** विधानसभा उपनिर्वाचने निर्वाचितानाम् त्रयाणां सदस्यानां शपथग्रहणं जुलाईमासस्य २२ दिनाङ्के भविष्यति। अस्मिन् विषये विधानसभासचिवालयात् अधिसूचना निर्गता। शपथग्रहणेन सह निर्वाचिताः सर्वे विधायकाः विधानसभासदस्यत्वेन गण्यन्ते। विधानसभायाः संयुक्तनिदेशकः हरदयालभारद्वाजः अवदत् यत् अस्मिन् विषये विधानसभायाः सर्वेभ्यः सदस्येभ्यः अधिकारिभ्यः च सूचना दत्ता अस्ति। शपथग्रहणं कर्तृषु सदस्याः देहरातः कमलेश ठाकुर, हमीरपुरतः आशीषशर्मा, नालागढतः हरदीपसिंह बावा च वर्तन्ते। देहरातः मुख्यमन्त्रिणः पत्नी कमलेशठाकुर विधानसभानिर्वाचने ९३९९ मतैः, नालागढे हरदीपसिंहबावा काङ्ग्रेसस्य नामपत्रेण ८९९० मतैः विधानसभानिर्वाचने, हमीरपुरे आशीषशर्मा भाजपायाः नामपत्रेण विधानसभानिर्वाचने १५७१ मतैः विजयं प्राप्तवन्तः। निर्वाचितानां त्रयाणां सदस्यानां शपथग्रहणेन सदनस्य काङ्ग्रेसविधायकानां संख्या ४०, भाजपाविधायकानां संख्या २८ यावत् भविष्यति। ततः पूर्वं लोकसभानिर्वाचनेन सह काङ्ग्रेसपक्षः चत्वारि आसनानि, भाजपा च षट् आसनेषु विधानसभा उपनिर्वाचने द्वौ आसनौ च प्राप्तवती। अधुना विधानसभा अध्यक्षः कुलदीपसिंह पठानिया 22 जुलै दिनाङ्के प्रातः 11वादने उपनिर्वाचने निर्वाचितत्रयसदस्यानां पदस्य शपथं गोपनीयतां च प्रदास्यति।

## अन्वेषणे हिमाचलप्रदेशस्य नव औषधउद्योगेषु निर्मितानि ११ औषधानि गुणवत्तामानकेषु विफलानि

केन्द्रीय औषधमानकनियन्त्रणसङ्गठनस्य (सीडीएससीओ) अन्वेषणे हिमाचलप्रदेशस्य नव औषधउद्योगेषु निर्मितानि ११ औषधानि, इन्जेक्शन्, त्वचासंरक्षणादयः उत्पादाः गुणवत्तामानकानां पूर्तिं न कृतवन्तः। अमानकानि औषधानि, त्वचासंरक्षणसामग्री च जीवाणुसंक्रमणस्य, एलर्जी, रक्तविकारस्य, विटामिनपूरकस्य, कृमिनाशकौषधानां, त्वचासंरक्षणफेनकानां च सन्ति। सीडीएससीओ द्वारा अधिसूचितायां जूनमासस्य औषधसचेतनायां देशस्य विभिन्नराज्यानां औषधोद्योगेषु निर्मितानि ३१ औषधानि अन्ये च उत्पादाः न्यूनतमगुणवत्ता युक्ता ज्ञाता, यस्मिन् हिमाचलस्य नव औषधोद्योगेषु निर्मिताः ११ उत्पादाः सन्ति . एतदतिरिक्तं राज्यप्रयोगशालायां कृतेषु परीक्षणेषु ३० औषधानि अमानकानि ज्ञातानि।

# अमृत योजनायां पर्वतीयराज्येभ्यः नियमेषु शिथिलता भवेत्



**हिमसंस्कृतवार्ताः - चण्डीगढ़म्।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः केन्द्रसर्वकाराद् आग्रहं कृतवान् यत् हिमाचलसदृशाणां कठिनभौगोलिकपर्वतीयराज्यानां कृते अटलमिशन-फॉर-रिजुवेनेशन- एण्ड- अर्बनट्रांसपोर्ट् (अमृत) इत्यस्य अन्तर्गतं परियोजनानां अनुमोदनस्य मापदण्डेषु शिथिलीकरणं भवेत्। योजनायाः अन्तर्गताः परियोजनाः जनसंख्यायाः आधारेण अनुमोदिताः भवन्ति, परन्तु हिमाचलप्रदेशसदृशस्य राज्यस्य कृते जनसंख्या-आधारित-मापदण्डः समीचीनः नास्ति । शुक्रवासरे मुख्यमन्त्री चण्डीगढस्य हिमाचलभवने केन्द्रीय-आवास-नगर-कार्यमन्त्री मनोहरलाल-खट्टर-इत्यनेन सह समागमे एतत् विषयं उत्थापितवान् । मुख्यमंत्रिणा उक्तं यत् १५ तमे वित्तायोगस्य अनुशंसानाम् अपि समये समये समीक्षा करणीया, यतः परियोजनानां व्ययः वर्धमानः एव भवति। प्रधानमन्त्री-आवासयोजनायाः अन्तर्गतं हिमाचलप्रदेशं सर्वोत्तमप्रदर्शकराज्येषु अन्यतमम् अस्ति । योजना-1 इत्यस्य अन्तर्गतं धनस्य पूर्णतया उपयोगानन्तरं योजना-2 इत्यस्य कृते धनं प्राप्तं भविष्यति। सुक्खुः उक्तवान् यत् राज्ये प्लास्टिकनिषेधस्य सफलता प्राप्यते। प्लास्टिकस्य उपयोगस्य मानवजीवने हानिकारकप्रभावस्य विषये जागरूकतां जनयितुं पंचायतानां असर्वकारीसंस्थानां च महत्त्वपूर्णा भूमिका अस्ति। विकासकार्यं शीघ्रं कर्तुं सः केन्द्रं निविदानीतिव्यवस्थायां संशोधनं कृत्वा निविदां अवधिं ६० दिवसात् १० दिवसान् यावत् न्यूनीकर्तुं आग्रहं कृतवान्। स्पीति इत्यादिषु सीमाक्षेत्रेषु हिमपातेन, प्रतिकूलवातावरणेन च उत्पद्यमानानां कष्टाणां निवारणाय बैटरी-बैकअप-सहितं एकं मेगावाट्-सौर-प्रणालीं अनुमन्यताम् इति केन्द्रीय-विद्युत्-मन्त्रालयात् आग्रहः कृतः। एतेषु क्षेत्रेषु निर्बाधं विद्युतापूर्तिं सुनिश्चित्य ३६२ कोटिरूप्यकाणां प्रावधानं कृतम् अस्ति । राज्यस्य स्वच्छनगराणि स्वच्छतामित्रम् सुरक्षितनगराणि इति घोषयित्वा स्वच्छताप्रयत्नाः वर्धयितुं अतिरिक्तं धनं विमोचयितुं केन्द्रात् अपि आह्वानं कृतवान्। केन्द्रीयमन्त्री हिमाचलस्य कार्यप्रदर्शनस्य प्रशंसाम् अकरोत्, केन्द्रसर्वकारस्य पूर्णसहकार्यस्य आश्वासनं च दत्तवान्।

## केन्द्रीयमन्त्री विद्युतोत्पादनं वर्धयितुं परामर्शम् अयच्छत्

ऊर्जामन्त्रालयस्य कार्यस्य समीक्षां कुर्वन् केन्द्रीयमन्त्री राज्याय विद्युत् उत्पादनं वर्धयितुं परामर्शम् अयच्छत् यतः राज्ये जलसम्पदाः प्रचुराः सन्ति। सः अवदत् यत् जलविद्युत् ऊर्जायाः सदुपयोगाय प्रवाहितजलस्य अधिकतमं उपयोगः सुनिश्चितः भवेत्।

# हिमाचलपरिवहनेन स्वस्य दैनिक-कर्मचारिणां दैनिकवेतनस्य वृद्धिः कृता



**हिमसंस्कृतवार्ताः,शिमला।** एचआरटीसी इत्यनेन स्वस्य दैनिकभोगीनां दैनिकवेतनस्य वृद्धिः कृता । सर्वकारस्य निर्देशे एचआरटीसी-संस्थायाः निदेशकमण्डलेन अपि दैनिकवेतनस्य वर्धनस्य निर्णयः कृतः, यस्मिन् विषये प्रबन्धनम् अधिसूचनां निर्गमिष्यति। सम्प्रति दैनिकवेतनप्राप्तिभ्यः प्रतिदिनं ३७५ रुप्यकाणि दत्तानि सन्ति, यत् प्रतिदिनं ४०० रूप्यकाणि यावत् वर्धयितुं निर्णयः कृतः अस्ति। शुक्रवासरे हिमाचलप्रदेशस्य पथपरिवहननिगमस्य संचालकमण्डलस्य सभा सचिवालये उपमुख्यमन्त्री मुकेशअग्रिहोत्री इत्यस्य अध्यक्षतायां आयोजिता। सभायां गृहीतनिर्णयानां विषये मुकेश अग्रिहोत्री मीडियाभिः सह अनौपचारिकवार्तालापेन उक्तवान् यत् निगमस्य हानिः अस्ति तथा च निगमस्य प्रबन्धनिदेशकेन हानिः न्यूनीकर्तुं लाभे आनेतुं च प्रतिवेदनं निर्मितम्। अस्य प्रतिवेदनस्य विषये निदेशकमण्डलस्य सत्रे प्रस्तुतिः कृता अस्ति, या मन्त्रिमण्डलस्य समक्षं प्रस्तुता भविष्यति। अस्मिन् सर्वकाराद् साहाय्यं याच्यते, यतोहि सम्प्रति सर्वकाराद् वार्षिकसाहाय्यं ७०० कोटिरूप्यकाणां परिधितः भवति, यदा तु व्ययः अतीव अधिकः अस्ति सः अवदत् यत् एचआरटीसी सर्वकारस्य प्रतिबद्धतां पूरयति, परन्तु अस्मिन् निगमस्य महती हानिः भवति।

# BJP Himachal : भाजपया प्रस्तावद्वयं पारितम्, मोदिने वर्धापनम्, भ्रष्टाचारविषये राज्यसर्वकारस्योपरि लक्ष्यम्




**हिमसंस्कृतवार्ताः - ऊना।** ऊनायां भाजपाराज्यविस्तारसमित्याः सभायां देशस्य राज्यस्य च राजनैतिकपरिदृश्यस्य विषये प्रस्तावद्वयं पारितम्। प्रथमसंकल्पे नरेन्द्रमोदी तृतीयवारं प्रधानमन्त्री भूत्वा जनकल्याणयोजनाः प्रारब्धवान् इति अभिनन्दनम् अकरोत् । द्वितीयसंकल्पे भ्रष्टाचारविषये राज्यस्य काङ्ग्रेससर्वकारस्योपरि लक्ष्यं कृतम्।

केन्द्रसर्वकारस्य वर्तमानपरिदृश्ये विधायकः त्रिलोकजमवालः प्रस्तावम् अयच्छत्। अस्य अनुमोदनं प्रदेशमहासचिवः बिहारीलालशर्मा, राज्यसभासांसद इन्दुगोस्वामी च अकरोत् । द्वितीयः प्रस्तावः विधायकः रणधीरशर्मा इत्यनेन राज्यस्य वर्तमानराजनैतिकस्थितेः विषये प्रस्तावितः। राज्यसभा सांसद डॉ. सिकंदरकुमारेण अस्य अनुमोदनं कृतम् तथा च सांसद अनुरागसिंहठाकुरः अस्मिन् विषये स्वपक्षं प्रस्तुतवान्। समागमानन्तरं पत्रकारसम्मेलने भाजपाप्रवक्ता रणधीरशर्मा अवदत् यत् राज्यस्य काङ्ग्रेससर्वकारः एकवर्षं यावत् धनं नास्ति इति रोदिति स्म अधुना सर्वकारस्य उद्धाराय ६ मासाः व्यतीताः। राज्ये काङ्ग्रेससर्वकारस्य अधीनं प्रचलितायाः परिस्थितेः उपरि सः तीव्रप्रहारं कृतवान् । मुख्यमन्त्रिणः स्वकीयं कार्यालयं भ्रष्टाचारस्य गुहा अभवत् इति उक्तवान्। अद्यावधि आपदा प्रभावितानां जनानां क्षतिपूर्तिः न दत्ता। विभिन्नेषु विभागेषु भ्रष्टाचारः प्रचण्डः अस्ति । राज्ये विधिव्यवस्था पूर्णतया भग्नाः सन्ति। काङ्ग्रेस-सर्वकारः प्रत्येकस्मिन् क्षेत्रे असफलः इति सिद्धः अभवत्, यस्य भाजपा-कार्यसमित्या घोर-निन्दा कृता अस्ति ।

सद्यः समाप्ते लोकसभानिर्वाचने हिमाचलप्रदेशः अपि चत्वारि लोकसभासनानि जित्वा नूतनं अभिलेखं स्थापितवान्। तस्मिन् एव काले मोदीसर्वकारस्य निर्माणमात्रेण प्रथममन्त्रिमण्डले आयुःसीमायाः शर्तं हृत्वा 70 वर्षाणाम् उपरि सर्वेभ्यः वृद्धेभ्यः आयुष्मानभारतयोजनायाः लाभः दत्तः, ३ कोटिभ्यः जनेभ्यः प्रधानमन्त्री- आवास-योजनायाः अन्तर्गत आवासप्रदानम् , ११ कोटि कृषकेभ्यः २२ सहस्रकोटिरूप्यकाणां किसान-सम्माननिधिप्रदानम् , अग्निवीरसैनिकानां कार्यावधिः चतुर्वर्षेभ्यः ७ वर्षाणि यावत् वर्धयितुं प्रदेशकार्यसमित्या स्वागतं कृतम् ।

# नीटयूजीप्रवेशपरीक्षाप्रश्नपत्रवंचनायां पटना एम्स इत्यस्य चत्वारः छात्राः निगृहीताः

नीट-यूजी प्रवेशपरीक्षाप्रश्नपत्रवंचनायां केन्द्रीयान्वेषणाभिकरणेन अखिल भारतीयआयुर्विज्ञानसंस्थानम् पटना इत्यस्य चत्वारः छात्राः निगृहीताः। एम्स-पटनायाः कार्यकारी निर्देशकः डी, जी के पालः उक्तवान् यत् ये छात्रा निगृहीताः ते एमबीबीएस पाठ्यक्रमस्य द्वितीय-तृतीयवर्षयोः छात्रास्सन्ति। तेनोदीरितं यत् केन्द्रिवान्वेषणाभिकरणेन निगृहीतच्छात्राणां संगणकयन्त्राण्यपि स्वायत्तीकृतानि। एतैः छात्रैः सह केन्द्रियान्वेषणाभिकरणस्य परिपृच्छा विहिता।




कामेश्वरसिंह- दरभङ्गा- संस्कृतविश्वविद्यालयस्य स्नातकोत्तरवेदविभागस्य वरिष्ठाय सहायकप्राध्यापकाय

**डॉ. सत्यवानकुमाराय**

**भावपूर्णा श्रद्धाञ्जलिः**



# बिहारवार्ता- माननीयः कृषिमन्त्री पान-उत्पादक-कृषकैः साकं साक्षात् संवादं कृतवान्



**हिमसंस्कृतवार्ताः -पटना बिहार, राघव नाथ झा।** बिहारस्य कृषिमन्त्री, मंगलपाण्डेय इत्यस्य अध्यक्षतायाम् कृषिभवने पटनायाः सभागारे पानकर्षणम् अधिकलाभकरं कर्तुं तत्र आगच्छन्तु तेषां समस्यानां निराकरणाय पान-उत्पादक-कृषकैः सह कार्यशाला आयोजिता। तस्मिन् माननीयः मन्त्री पान-उत्पादक-कृषकैः सह साक्षात् संवादं कृतवान्। माननीयः मन्त्री उक्तवान् यत् युवा- पान- उत्पादक-कृषकाणां साहसं दृष्ट्वा अहम् अतीव प्रसन्नः अस्मि। सः उक्तवान् यत् पान-उत्पादक-कृषकाणाम् अधिकम् आर्थिकं लाभं दातुं पानस्य आवरणक्षेत्रस्य विस्तारः आवश्यकः अस्ति। पानस्य विविधानां प्रभेदानां गुणवत्तायुक्त-बीजानां च उपलब्धतया सह उत्पादनं, भण्डारणं च विपणनस्य च सम्यक् व्यवस्था भवेत्, यथा पान-उत्पादक-कृषकाः अधिकं लाभं प्राप्नुवन्ति। सः उक्तवान् यत् बिहार-सर्वकारस्य कृषिविभागेन वित्तीयवर्षस्य 2024-25तः 2025-26 पर्यन्तं पानविकास- योजनायाः अन्तर्गतं ४२.५० हेक्टेयरमध्ये पानस्य क्षेत्रविस्ताराय ५ करोड़ रूप्यकाणि स्वीकृतानि। पानस्य कर्षणं बिहारस्य प्रमुखतया १५ जनपदेषु यथा औरंगाबाद, गया, नालन्दा, नवादा, शेखपुरा, वैशाली, सारण, मुंगेर, पूर्वी चम्पारण, खगड़िया, बेगूसराय, मुजफ्फरपुर, मधुबनी, दरभंगा, समस्तीपुर च जनपदेषु क्रियते। पानस्य कर्षणाय बरेजस्य निर्माणं क्रियते। बरेजस्य निर्माणं सामान्यतया 100 वर्गमीटर, 200 वर्गमीटर च एषां गुणकेन क्षेत्रफलेन कृषकैः क्रियते। सः उक्तवान् यत् पानस्य कर्षणं प्रोत्साहितुं कृषकाणाम् आयस्य वृद्ध्यर्थं च बरेजस्य निर्माणे पानस्य कर्षणे च सहायतायाः प्रावधानं क्रियते, यस्मिन् कस्यचित् कृषकस्य क्षेत्र-सत्यापनस्य आधारतः न्यूनतम् 11,750 रूप्यकाणि अधिकतम् 35,250 रूप्यकाणि च सहायतायाः प्रावधानम् अस्ति। कृषिविभागस्य सचिवः संजयकुमारअग्रवालः उक्तवान् यत् पानस्य कर्षणं कुर्वन्तः कृषकाणां कृते अपि कृषक-क्रेडिट-कार्डं प्राप्तुं व्यवस्था क्रियते। तेन उक्तं यत् पानस्य अनुसंधानाय अस्याः प्रविधेः ज्ञानस्य उपलब्धतायै च नालन्दाजनपदस्य इस्लामपुर-प्रखण्डे पान- अनुसंधान- केन्द्रस्य स्थापना कृता। पान-अनुसंधान-केन्द्रे शेडनेटमध्ये पानस्य कर्षणस्य प्रत्यक्षणं तथा ऑयल-एक्सट्रैक्शन-यूनिट इत्यस्य स्थापना अपि कृता। उद्यान-महाविद्यालयः नूरसराय इति पानस्य अनुसंधानं कर्तुं निर्देशितः। पान-संबद्ध-योजनायां "प्रथमम् आगच्छ, प्रथमं प्राप्नुहि" इत्यस्य समाप्तिः कृत्वा लॉटरी द्वारा लाभार्थिनां चयनं करिष्यते। सः अपि उक्तवान् यत् आधुनिकतया पानस्य कर्षणे विशेषं ध्यानं दातुं समुचित-सिंचन-व्यवस्था, शेडनेट, शीतभण्डारणं, पानस्य प्रसंस्करणयूनिट विपणनकेन्द्रं च विस्तृत-अध्ययनं करोतु निर्देशं दत्तवान्। कार्यशालायां कृषिनिदेशकः मुकेशकुमारलालः, उद्याननिदेशकः अभिषेककुमारः, माननीयः कृषिमन्त्रिणः आप्त सचिवः अमिताभसिंहः, विभागीयाः पदाधिकारिणः, पान-अनुसंधान-केन्द्रस्य वैज्ञानिकाः, पान-उत्पादक-कृषकाश्च उपस्थिताः आसन्।

# वेदस्य वरिष्ठप्राध्यापकस्य चर्चितकथावाचकस्य च डॉ. सत्यवानकुमारस्य असामयिकं निधनम्

**हिमसंस्कृतवार्ताः,राघव नाथ झा दरभङ्गा।** कामेश्वरसिंह- दरभङ्गा- संस्कृतविश्वविद्यालयस्य स्नातकोत्तरवेदविभागस्य वरिष्ठः सहायकप्राध्यापकः डॉ. सत्यवानकुमारः गुरुवासरे रात्रौ चिकित्सायाः अनुक्रमे मृतः। सः द्विपञ्चाशत् वयसि आसीत्। रोगस्य आकस्मिकम् उद्भवने सः प्रथमं स्थानीयमहत्यां चिकित्सालये प्रविष्टः। तस्य अन्त्येष्टिः नवगछियायां कृता, यत्र सहस्रशः तस्य प्रियजनाः सम्मिलिताः। यत्र सः एकविंशतिः तः जुलाईतः दशदिनानाम् अनुष्ठानं कर्तुम् उद्दिष्टः आसीत्। पीआरओ निशिकान्तेन उक्तमस्ति यत् भागलपुरजनपदस्य भरतखण्डग्रामस्य मूलनिवासी डॉ कुमारः २००९ तमे वर्षे सहायकप्राध्यापकपदे वेदविभागे योगदानं दत्तवान्। तेन संस्कृतविश्वविद्यालये पदाधिकारीरूपेण अपि अनेकपदानि सुशोभितानि। तस्य शिक्षा वाराणस्यां च स्थानीयसंस्कृतविश्वविद्यालये अभवत्। सः वेदकर्मकाण्डयोः विद्वान् कुशलः चर्चितः पुराणकथावाचकः अपि आसीत्। रंगमञ्चे गीतसङ्गीते च अपि सः कुशलः कलाकारः आसीत्। वैदिकविधिना देवतानां प्राणप्रतिष्ठा मन्दिरस्थापनायां च निष्णातः आसीत्। सः सरलः मृदुभाषी विनोदीप्रकृतिश्च आसीत्। डॉ. कुमारस्य निधनस्य सूचनायां विश्वविद्यालयः सम्पूर्णः शोकग्रस्तः अभवत्। शोकसंवेदना प्रकट्यन् कुलपतिः प्रो. लक्ष्मीनिवासपाण्डेयः, प्रतिकुलपतिः प्रो. सिद्धार्थशंकरसिंह, कुलसचिवः प्रो. ब्रजेशपतित्रिपाठी, वेदविभागाध्यक्षः डॉ. विनयकुमारमिश्रः सह अन्ये विभागाध्यक्षाः समवेतस्वरे उक्तवन्तः यत् डॉ कुमारः बहुमुखीप्रतिभायुक्तः आसीत्। तस्य निधनं विश्वविद्यालयस्य अपूरणीयक्षतिः अस्ति। सर्वे दिवंगतात्मनः शान्तिं शोकसंतप्तपरिजनानां दुःखात् निवारणं च ईश्वरात् प्रार्थयन्ते स्म।